This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ऐहिकप्रायश्चित्तप्रारंभः॥

Acc. No: - ~~2318~~ M 1131

Title: - ऐहिक प्रायश्चित

Subject: - Ritual

पेजे. - (23)

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य ॥श्रीगणेशायनमः॥आश्वलायनबौधायनमूलव्य (नम.व) दर्शपूर्णमासादीनिकर्माणिकु
१ र्वतःसुगमपक्षमलंब्यऐष्टिकानिप्रायश्चित्तानिकानिचिल्लिख्यंते॥अन्वाधानानंत
रंदक्षिणाग्निनाशेशुचिर्भूत्वाखाविहारंप्रविश्यगार्हपत्यंप्रणीयेणानायमन्यदक्षिणा ग्रा
ग्निनाशनिमित्तंप्रायश्चित्तंकरिष्ये॥इतिसंकल्प्यगार्हपत्येस्मार्तवदाज्यंसंस्कृत्यस्रुवस्रु
वंनिष्टप्यसंमृज्यस्रुचिचतुर्गृहीतंगृहीत्वाहवनीयेकांचित्समिधमाधायजुहोति॥मनो
ज्योतिर्जुषताम्० घृतेनस्वाहा॥मनसेज्योतिषइदं०॥संगतासिच्यर्थएकांस्रुवोजुहुयात् उति
भूर्भुवःसुवःस्वाहाप्रजापतयइदं०॥ततोविष्णुस्मरणं॥अध्वर्युःसंनिधौसएवसर्वंकुर्या
जमा त्॥संकल्पत्यागेचयजमानःकुर्यात्॥विष्णुस्मरणमुभयोः॥ऐष्टिकाज्येनस्मार्तवदाज्यसं सति
स्कारः॥ऐष्टिकसंमार्गेसतिनपुनःपात्रसंस्कारः॥इत्युक्तंप्रायश्चित्तेचंद्रिकायां॥ततो
दक्षिणाग्नेःपश्चादूर्ध्वजानूरुपविश्यमर्त्यंयज्ञंत्वित्यादिनात्रीणिकाष्ठान्यभ्याधाय
याद्दितिभिरुपस्थानंकृत्वापरिसमूहनादिकुर्यात्॥एवमन्वाहिताहवनीयनाशे
देशे पि॥आहवनीयस्योत्तरतःपश्चिमेप्रक्षेत्रिष्ठंधानाधातॄणामित्यादिनात्रीणिकाष्ठा
ण्यभ्याद्धानिइतिविशेषः॥उभयोर्नाशेपिआहवनीयंप्रणीयपूर्ववदाहवनीयेप्राय १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चित्तानि कृत्वा पश्चाद्दक्षिणाग्निं प्रणीय पूर्ववद्दक्षिणाग्निप्रायश्चित्तानि कुर्यात्॥ तत्प्रायश्चित्त
स्याहवनीयसापेक्षत्वात्पूर्वं च तदसिद्धेः॥ आहवनीये ध्रियमाणे अन्वाहितगार्हपत्यनाशे दक्षि
णेन विहारं सर्वमाहवनीयं गार्हपत्यायतने पूर्ववदानीय तत आहवनीयं प्रणीय पूर्ववन्मन
स्वत्याः प्रायश्चित्तं हुत्वा गार्हपत्यस्य पश्चादुपविश्य ममाग्ने वर्च इत्यादिना त्रीणि काष्ठान्यभ्याधा
यव्याहृत्युपस्थानं परिसमूहनं च कृत्वाहवनीये अन्वाधानोपस्थानपरिसमूहनानि कुर्यात्॥
एवं गार्हपत्य दक्षिणाग्न्योर्नाशे पूर्ववद्गार्हपत्यायतने आहवनीयमानीय तत आहवनीयं प्रणी
य पूर्ववद्गार्हपत्यनाशप्रायश्चित्तं कृत्वा पश्चाद्दक्षिणाग्निं प्रणीय तन्नाशनिमित्तप्रायश्चित्तं कु
र्यात्॥ तस्य गार्हपत्यसापेक्षत्वात्॥ पूर्वं च तदसिद्धेः॥ एतत्समानयोनित्वपक्षे ततः प्रत्येकं अन्वा
धानोपस्थानपरिसमूहनानि कुर्यात्॥ गार्हपत्याहवनीययोर्नाशे तूभयनिष्ठभस्मनारणीऽ
अयं त इति मंत्रेण संस्पृश्य इतः प्रथमं जज्ञे वह्नि तु प्रजानन्निति मंत्रेण मथित्वा गार्हपत्यमाध्या
यतन आहवनीयं प्रणीय पूर्वोक्तप्रायश्चित्तं तंत्रेण कुर्यात्॥ न क्रमेणोभयोरुभयसापेक्षत्वं
त्वेन क्रमानुपपत्तेः ततस्तूभयत्राग्न्यन्वाधानोपस्थानपरिसमूहनानि एवं सर्वनाशे आयतनत्रयनि
ष्ठभस्मनारणी अयं त इति मंत्रेण संस्पृश्य पूर्ववन्मथित्वाग्निद्वयं विहृत्य पूर्ववत्प्रायश्चित्तं कृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंत्रेण पश्चाद्दक्षिणाग्निं विहृत्य तत्प्रायश्चित्तं कुर्यात्॥ तस्योभयसापेक्षत्वात्॥ ततः सर्वत्रान्वा
२ धानोपस्थाने सर्वनाशे भस्मनारमणीसंस्पर्शनाभावेप्यसति सूर्योदयास्तमयौ चेद्भवतस्त
न दाग्निविच्छित्तिः॥ अन्वाहितानामजस्राणां यदा कदाचिन्नाशेपि एतदेव प्रायश्चित्तं॥ तत्र अन्वा
धानादि नास्ति॥ पक्षांतरमुक्त्वाह बौधायनः॥ मनस्वती चेदाहवनीये जुहुयात्॥ सैषामजस्रा
ना णामन्वाहितानां सवनगतानां चाग्निमुखानां प्रायश्चित्तिरेतदेव होमकालेन्वाधानवर्जमि
र ति॥ एतं ये वा तेकस्मिन्नुद्धार्यैनेहूयोवेति च॥ विहृतिषु अन्वाहितनाशे एतदेव प्रायश्चित्तं॥ वरु
णप्रघासेषु औत्तरवेदिकस्याग्नेर्दक्षिणविहारस्थस्य वा नाशे शालामुखीयात्प्रणीय पूर्वोक्तं
प्रायश्चित्तं कुर्यात्॥ नात्रान्वाधानं॥ शालामुखीयान्वाधानातिरिक्तेन पृथगन्वाधानस्य पूर्वत्रान
नुष्ठानात्॥ न चैवमन्वाहितप्रायश्चित्तं न स्यादिति वाच्यं॥ अन्वाहितशालामुखीयात्प्रणीत
त त्वेनानयोरन्वाहितत्वात्॥ अन्वाहितशालामुखीयनाशे तु पुराणगार्हपत्यात्प्रणीय पूर्वोक्तं प्रा
यश्चित्तं कृत्वा अन्वाधानादि कुर्यात्॥ यस्माद्यः प्रणीतस्तन्नाशे ततः प्रणयनं॥ विशेषरूपेण
केषुचिदुक्त्वाह भगवान्बौधायनः॥ एतद्ये वाहृता एकस्मिन्नुद्धृते येहूयोर्वेति॥ अन्वाहितपुरा ते
णगार्हपत्यनाशे तु प्रायश्चित्तादि पूर्वोक्तमेवं सैषामजस्राणामन्वाहितानामिति भगवनात उक्त
त्वात्॥ उत्पत्तिप्रकारो नोक्तः॥ अतः सौ कुर्यात्॥ सह भस्मानं वा गार्हपत्यायतने निधायाथ प्रांच २

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तं प्रायश्चित्तं चंद्रिकायां। यद्याहवनीये ध्रियमाणेऽस्तगार्हपत्यनाशेऽन्वाहितगार्हपत्यनाशे होमकाले वा गार्हपत्यनाशे

माहवनीयमुद्धरेत्॥ इति भगवदाश्वलायनोक्तप्रकारमवलंब्य शालामुखीयं दक्षिणेन विहारं गा
र्हपत्यायतने आनीय तत्र तस्मादुद्धृत्य पूर्वोक्तं प्रायश्चित्तं कुर्यादिति॥ तदेतदाहवनीये ध्रियमाणेऽ
स्तगार्हपत्यनाशेऽ ~~न्वाहितगार्हपत्यनाशे~~ उक्तप्रकारेणाहवनीयमानीय ततः प्रणीय तपस्वती
ष्टिः कार्या॥ तदशक्तो पूर्ववच्चतुर्गृहीतेन द्वादशगृहीतेन वाज्येन पूरयित्वाहवनीये जुहुयात्॥ अ
ग्नये तपस्वते जनद्वते पावकवते स्वाहा॥ अग्नये तपस्वते जनद्वते पावकवत इदं॥ ततः सांगता
सिद्ध्यर्थं सर्वप्रायश्चित्तं विष्णुस्मरणं च कुर्यात्॥ ब्रह्मसंनिधौ सएव न सर्वं कुर्यात्॥ त्यागं य
स्या जमानः कुर्यात्॥ सर्वावस्थस्य गार्हपत्यानुगमने मंथमे मंथमे वा सति। ध्रियमाणे आहव न
नीये अयं विशेष इति वदता वृत्तिकृतात्रैतदुक्तमिति॥ यद्यन्वाहितगार्हपत्यनाशेऽन्वाहितपुरा
णगार्हपत्यनाशे वा पूर्ववन्मथित्वा गार्हपत्यमाधाय पूर्ववदन्वाहितप्रायश्चित्तमाहनीयकु
र्यात्॥ नात्राहवनीयानुगमनमित्यापस्तंबग्रंथेषु प्रायश्चित्तचंद्रिकायामिति॥ अस्मिन्विषे
ये मंथनमात्रमुक्तं न त्वाहवनीयानुगमनं॥ पित्र्यायामपि अन्वाहितनाशे यो यतः प्रणीतस्त
ततः॥ प्रणीयोक्तमन्वाहितप्रायश्चित्तं कुर्यात्॥ सर्वत्रान्वाधानात्पूर्वं नाशे पूर्वोक्तमेव प्रा
यश्चित्तं॥ अथातोऽग्नीनामुद्धृतानां प्रायश्चित्तिर्मनस्वती सेकरस्याह भगवान्बौधायनः
॥ इष्टिमध्ये प्रयाणप्रभृतौ गार्हपत्य आज्यसंस्कृत्य ज्ञात्वा व्याहवनीये स्रुवेण जुहोति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्॥ अग्ने कामाय येमिरे स्वाहा॥ अयपयरदं॰॥ ततो रणीमा
३ ह्यपत्ये यजमानः॥ प्रतिजपेत्॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः॥ तं जानन्न अग्न आसीदा
था नो वर्धया गिरः॥ इति तूष्णीमितरयोः प्रतिजपेत्॥ ततस्थलंतरं गत्वा विहारं कल्पयित्वा उद्ध
न्यमान इत्युद्धृत्य शं नो देवीरित्य वोक्ष्य अरणी॥ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह
नः प्रजानन्॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथाभव यजमानाय शंयोः॥ इति मंत्रेमंथयेत्॥ स्वयं ण
वा मंथितं॥ प्रतियत्नं मंत्रा हुतिः॥ जातमग्निं गार्हपत्ये आधाय तत उभयत्र विलंब्यारणीं तिगनः
प्रायश्चित्तं करोति॥ तत्रैवं॥ गार्हपत्ये आज्यं संस्कृत्य स्रुक्स्रुवं निष्टप्य स्रुचि चतुर्गृहीतं गृहीत्वा
हवनीये जुहोति॥ मनो ज्योतिरिति ततः सर्वप्रायश्चित्तं विष्णुस्मरणं च कृत्वा स्थिष्टशेषं समापये
त्॥ अन्वाधानांतरम बुद्धिपूर्वकेरेतः पाते इममेव वरुणा तत्त्वायामी त्येताभ्यां स्रुवाहुती आज्य
भागानंतरं जुहुयात्॥ बुद्धिपूर्वकेरेतः पाते आर्त्यांश्रुपाते मधुमाषादिभक्षणे वा [illegible] व्रतयती
ग [illegible]को आज्यभागानंतरं स्रुचि द्वादशगृहीतं चतुर्गृहीतं वाहवनीये जुहुयात्॥ अग्ने व्रत
पतये स्वाहेति॥ ततो विष्णुस्मरणं॥ अन्वाधानानंतरं चंद्रसूर्यग्रहणे आज्यभागानंतरं स्रु
वाहुतीर्जुहुयात्॥ उद्वयं॰ उदुत्यं॰ चित्रं देवानां॰ त्रिषु सूर्याये दं॰ अन्वाधानदिने पत्नीरज
नुमती चेत्तां विहाय इष्टिः॥ योक्तेऽग्ने वैयांश्च दृग्गाग्ने निधाय पत्नीमंत्रान्यजमानो जपेत्॥ ए ३
तद्द्वितीयप्रयोगे विकृतिषु द्वितीयप्रयोगोपक्रमो भवति॥ उपक्रमोत्तरकाले रजोनुमती चेत्स
पिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेत्रतां विहायइष्टिः॥ प्रथमप्रयोगे पित्र्यन्वारंभणीयायां व्रतोपायनादूर्ध्वं चेदृतुमती तां विहा
यान्वारंभणीयां समाप्य यस्यान्वारंभणीयानंतकर्म समापयेत्॥ यथाहुः॥ प्रक्रांतमग्निहोत्रादि
श्रु कर्मयद्ध्रुतिचोदितं॥ आर्तवाभिछ्छतां पत्नीं विहाय कुरुते द्विज इति कात्यायनोक्तेः॥ इष्ट्यन्वारंभ
हुते णीयायां पौष्टुकं वैकृतीष्टिषु॥ वृताद्ध्वं मृते दृष्ट्वा कुर्यात् कार्यं न लोपयेत्॥ प्रोषिते यजमाने व्र
त्येहनि ऋतुमती चेत्तदा पंचमेन्हि यागः॥ प्रोषिते संकल्पोत्तरकाले चेत्तत्राम परुध्य कुर्यात्॥८
चातुर्मास्येषु वैश्वदेवपर्वणो यागे कृते वरुणप्रघासादिष्वनारब्धेष्वपि मलिनांबरायां स्वे
स्वकाले परुध्य यागः॥ कर्तव्य इत्युक्तं शतदृष्ट्यां॥ आधाने दक्षिणाप्रतिग्रहात्पूर्वं चेदृतुमती त म
दाग्न्योर्लौकिकि[illegible]भवति॥ सर्वमुत्सृज्य हविरप्सु क्षिप्त्वा पुनः संधांतरेण्याधानं कुर्यात्॥ दक्षि
णाप्रतिगृहानंतरं चेदृतुमती तामपरुध्य समापयेत्॥ शुध्यनंतरमग्निहोत्रारंभः॥ मंत्रेणप
रिस्थापितशाखेध्माबर्हिरादिर्यं घघस्त्रा ननतिनदाब्रह्मप्रतिष्ठेति मंत्रेण एवं वत्सस्थाप्या
ज्यसंस्कृत्य स्रुवं संमृज्य तेनैव मंत्रेणाहवनीये स्वाहाकारांतेन अध्वर्युः स्रुवाहुतिं जुहुयात्॥
यज्ञोय ब्रह्मणे इदं०॥ आज्यभागानंतरं वाज्यस्थाल्याज्येन हुत्वा विष्णुस्मरणं कुर्यात्॥ शाखेध्मा
परि बर्हिःप्रस्तरवेदप्रस्तरणपवित्रविधृतिपरिधिउपवेषादिद्रव्याणां दोहादिनानाशे विष्णू
श्रुत्वा स्रुपहतो वाध्वर्युः तज्जातीयमन्यद्विधाय स्वस्थाने नियोजयेत्॥ तत आज्यभागानंत
रं वा पूर्ववत्स्रुवाहुतीं जुहुयात्॥ त्वमग्ने अयास्यं० भेषजं स्वाहा अयसेग्नय इदं० प्रजापते न त्वं०

आज्यं संस्कृत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयीणाए स्वाहा प्रजापतय इदं० ततो विष्णुस्मरणं॥ आज्यविल्लोकानंतरं पवित्रनाशे एतत्प्रायश्चि
४ त्तं॥ तस्याकृमिंदादिगणाइति केचित्॥ सा चाग्रे वक्ष्यते॥ सर्वदा समुत्पन्ने पि वा पवित्रनाशे मिंदा
दिगणो वा प्रायश्चित्तमित्युक्तं प्रायश्चित्तमदीये॥ इध्माबर्हिषोः प्रयाजानुयाजाज्येष्वन्यूनातिरेके॥ नां
ध्वर्युर्निमित्तानंतरमाज्यभागानंतरं स्विष्टकृतः प्राग्वा समिध्य यजुषः प्राग्वा यथासंभवमाज्यस्था
ल्याज्यं स्रुवेणाजुहुयात्॥ यस्याकत्रा मनसा॰ प्रजापतिः स्वाहा॥ प्रजापतय इदं०॥ इध्माबर्हिषोरधिकं
त्याज्यं न्यूनं संपाद्यं संभावितः संस्कारः कार्यः ततो विष्णुस्मरणं॥ प्रणीतानां प्रोक्षणीनां चावस्कं
दे स्वं स्रवणे वा अध्वर्युरापो हि ष्ठेति तिसृभिरापूर्य निमित्तानंतरमाज्यभावे तत्संस्कृत्याज्यभागा
नंतरं आज्यस्थाल्याज्यं गृहीत्वा स्रुवेणाजुहुयात्॥ ततम आपस्तं० तस्मै वः स्वाहा॥ ऋतुभ्य इदं०॥ विष्णु
स्मरणं॥ यष्टव्यदेवताशब्दस्थाने अयष्टव्यदेवताशब्दोच्चारित कालएव स्मरणे पुनः सम्यगु
च्चार्याध्वर्युः पूर्ववत्स्रुवाहुतिं जुहुयात्॥ यह्वो देवा अपाहृतानि० तत स्वाहा मरुद्भ्य इदं०॥ विष्णु
स्मरणं॥ व्युत्क्रमेण निर्वापे कृते ब्रह्मा पूर्ववत्स्रुवाहुतिं जुहुयात्॥ यह्वो देवा० तस्मै यज्ञ मू
नो मुखं धनं दद्यात्॥ विष्णुस्मरणं॥ भागिन्यै देवतायै निरूप्य प्रोक्षणादिषु अभागिन्युल्लेख
न न प्रवृत्ते कर्मणि गते प्रयाजानंतरं प्राग्विस्मरणस्मरणं चेत्तदाध्वर्युः पूर्ववद्यह्वो देवेति स्रुवा
हुतिं हुत्वा विस्मृतदेवतायै यागं कुर्यात्॥ तत्र प्रयाजानंतरं स्मरणे सति पुनश्च पदाना
दि विस्मृतदेवतायै निरूप्यो भयायोगः कर्तव्य इत्युक्तं प्रायश्चित्तचंद्रिकायां॥ अभागिन्यै ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्म

निरूप्यभागिन्यांतिश्चेत्॥निरुप्तममुष्येत्वेत्यभिमृश्यामुष्येस्वाहेतिसर्वमग्नौजुहुयात्॥तत्रपहे
देवास्त्वंनोअग्नेसत्वंनोअग्नइतिस्रुवाहुतीर्जुहुयात्॥विष्णुंस्मृत्वापुनर्भागिन्येनिर्वपेत्॥एतद्दासा
दृनाद्योक्त॥अनंतरंस्मरणेविस्मृतदेवतायैनिरूप्योभयोर्योगः॥तत्रमिंदाहुतीर्जुहुयात्॥यन्म
आत्मेनपुनरग्निः ततोव्याहृतिभिर्हुत्वाविष्णुस्मरणंकुर्यात्॥अग्निहोत्रेकुशेषुसादितेनिरुप्तेहवि
षिसमिद्धयजुषःपूर्वंमनुष्यादिर्यदिविहारमतिक्रमेत्तदायेनपथाव्यवायोजातःतेनैवपथागौर्ने
तव्या॥ततोगार्हपत्याहवनीयपर्यंतंभस्मभस्मरेखामुदकधारांसंततनुयात्॥तंतुंतन्वन्रजसोभा
नुमन्विहीतिमंत्रेणप्रत्येकंमंत्रावृत्तिः॥ततआहवनीयमनुगमयित्वापुनःप्रणीय॥यदग्नेपूर्वंप्र
हितंपदंहितसूर्यस्यरश्मीनन्वाततान॥तत्ररयिष्ठामनुसंभरेतंसंनःसृजसुमत्यावाजवत्या।
त्वमग्नेसप्रथा॰तन्वतेइरमुपतिष्ठेत्॥ततस्तद्देवतंत्रमुपजीव्यश्रूपादानादिपाथिकृतीकार्या।
सामिद्धयजुषऊर्ध्वंचेत्तद्देवंगवातिक्रमात्तिउपस्थानांतंकृत्वाकर्मसमाप्यतेष्ववाग्निषुअन्वा
धानादिपाथिकृतीकार्या॥अग्निनाव्यवायेतुपाथिकृत्येवअष्टाकपालःवैस्याहिवेधोअध्व
नःपथश्चदेवांजसा॥अग्नेयज्ञेषुसुक्रतो॥येयजामहेग्निंपथिकृतमादेवानामपि॰यातीवी॰
॥०॥अनड्वान्दक्षिणा॥ततोविष्णुस्मरणं॥कर्ममध्यादन्यत्रपुरुषादिनाव्यवायेमनस्वस्याच
नुर्गृहीतहोमः॥बौधायनमतेकर्ममध्येद्विपदानांचतुष्पदानांमार्जारादीनामग्निमध्येत्रं
दिगोग्निमध्येवागमनेध्वर्युर्निमित्तानंतरएष्टिकाज्यासिद्धोआज्यंकृत्यस्रुस्रुवौसंमृज्ये
कृ

तस्मिं होतेनैवाज्यभागाद्यनंतरं वा यथासंभवं जुह्वां सकृद्गृहीत्वाहवनीये जुहोति ॥ यन्म आत्मनो भिं

५ दाभूत् ॰ पुनरग्निरिति द्वाभ्यां व्याहृतिभिर्हुत्वा ॐ स्वाहा ॥ ब्रह्मण इदं ॰ इमं मे वरुण तत्वायामि त्वं

नो अग्ने स त्वं नो अग्ने यथालिंगं त्यागः ॥ यच्छिद्रितं इति तिस्रो वा ॥ तंतुं तन्वन्रजसो ॰ जनं स्वाहा ॥

उद्बुध्यस्वाग्ने ॰ मेतं स्वाहा ॥ त्रयस्त्रिंशत्तंतव ॰ अप्येतु स्वाहा ॥ अग्नये तंतुमत इदं ॰ ॥ अन्वग्निरुष

सा ॰ तता नं स्वाहा ॥ अग्नये जातवेदस इदं ॰ ॥ मनो ज्योति ॰ घृतेन स्वाहा ॰ मनसे ज्योतिष इदं ॰ भू

रग्नये च ॰ भुवो वायवे च ॰ सुवरादित्याय ॰ भूर्भुवः सुवश्चंद्रमसे च ॰ यथालिंगं त्यागः ॥ सप्त ते अग्ने

अग्नये सप्तवत इदं ॰ ॥ प्रजा- पतेन ॰ प्रजापतय इदं ॰ ॥ विष्णुस्मरणं ॥ अंतरागमनादीनि कानिचिं

निमित्तान्युपन्यस्याह भगवान्बौ ॰ ॥ मिंदाहुती च होतव्ये व्याहृतीः प्रणवाधिकाः ॥ वारुण्यस्तंतु

मत्यश्च अन्वग्निश्च मनस्वती ॥ महाव्याहृतयः सप्त प्राजापत्यं तथैव च ॥ प्रसंधानाय यज्ञस्य

एते मंत्राः प्रकीर्तिताः इति स्मृतेः ॥ सप्त ते अग्न इति मंत्रोक्तिः अग्नये मिंदादिगणः ॥ हविषां स्कं

नमभिमृशेद् देवां जनमगन्यज्ञः ॥ भूपतये स्वाहा ॥ भुवनपतये स्वाहा ॥ यज्ञस्य त्वा प्रमया उन्म हे

याभिन्या प्रतिमया ॥ इंद्रस्य सख्यं देवि ॥ होत्रा इति वा ॥ अवशिष्टेन प्रचरेत् ॥ शेषाभावे पुनर्मंत्र

वं निर्वापादि कुर्यात् ॥ आज्यभागानंतरं सर्वप्रायश्चित्तं विष्णुस्मरणं च कुर्यात् ॥ पाकास्रुवे

हविषां केशाद्युपहतौ प्रक्षालनेन प्रोक्षणेन वा शुद्धिः ॥ पुरोडाशश्रपणमारभ्य कपाले ह्यास ५

नपर्यंतं कपालेनष्टे द्व्यक्षशक्तौ स्रुचं द्वादशगृहीतेनैवाहरयित्वा जुहुयात् ॥ अग्नये वैश्वानरा

चतुर्गृहीतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्वाहा॥अग्नये वैश्वानरायेदं०॥पात्रासादनादि अपणा दर्वी रु कपालभेदने गायत्र्यात्वा शताक्ष
रयासंदधामितिसंधाय॥अभिंनोघर्मोजी०संचरंतु॥त्रयस्त्रिंशं०नु देवानिति मंत्राभ्यां मप्सु प्रक्षि
पेत्॥एवंश्वादिभिराघ्रातानि कपालानि पूर्वमंत्राभ्यामप्सुक्षिपेत्॥ततः कपालांतरं प्रोक्षणादि कृ
त्वा योजयेत्॥सर्वप्रायश्चित्तं विष्णुस्मरणं च कुर्यात्॥यथोक्तसंख्यानामधिकोपधाने न्यूनोपधाने वा
उ. कपालानां परस्परं हस्मयं मेलनाभावे वा अंगुलहूयप्रमाणाभावे च आज्यभागानंतरं अध्वर्युर्व्याहृ
तिभिः स्रुवाहुतीर्जुहुयात्॥कपालोपधानकाले निहितांगारेषु पुरोडाशधानात्सर्वमनुगते मन
स्वतीमाहवनीये हुत्वा पुनः कलेष्वंगारं निदध्यात्॥अन्यानि मृन्मयपात्राणि अकृतप्रयोजनानि
भिन्नानि अशुचिसंबंधीनि वा॥भूमिर्भूमिमगान्माता मातरमप्यगात्॥भूयास्म पुत्रैः पशुभिर्यो
नो द्वेष्टि स भिद्यताम्॥इति मंत्रेणाप्सु प्रक्षिपेत्॥सर्वप्रायश्चित्तं कृत्वा पूर्ववत्पात्रांतरं योजयेत्॥
[illegible]स्मिन्कस्मिंश्चिद्दारुमये पात्रे भिन्ने तत्स्थाने अन्यं निधाय भूरायुर्मे धा॰ यत प्राणं मे धारय
त प्रजां मे धारयत स्वः अन्नं मे धारयत मम आयुः प्राणाः प्रजाः पशवः परासिच्येरन्॥इत्यभिमंत्र्य
न दुर्गादिगणे सहादशगृहीतेन स्रुचं पूरयित्वा जातवेदसे मनो ज्योतिर्हृद्भ्यां तिसृभिर्महाव्या रिति
हृतिभिर्हुत्वा एवं दुर्गादिगणः॥मिंदादिगणेन च जुहुयात्॥मिंदादिगणेन दुर्गादिगणेन च
हुत्वा॥भिन्नं पात्रं भूमिर्भूमिमगादित्याहवनीये नु प्रहरेत्॥पात्रमध्ये जलादौ विद्यमाने
इदं प्रायश्चित्तं॥केवलपात्रभेदे आहवनीये पात्रं प्रास्य मिंदादिरेव न भूरायुर्मे इत्युक्तं प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यश्चित्तंचंद्रिकायां ॥ गार्हपात्यदक्षिणाग्न्योराहवनीयतनाहुतिः पानेत्र छींप्रक्षिप्य ब्रह्मसाव्याहृतिभि
ध र्जुहुयात् ॥ जलाद्विनाग्न्युपघाते ॥ पुनस्त्वादित्या० कामाः ॥ इध्मेनत्थासमिधमाधायआज्यभागाद्यनंत
रंयक्षासंभवंअध्वर्युरनेनैवमंत्रेण स्वाहाकारांतेनस्रुवाहुतिंजुहुयात् ॥ अग्नयइदं० ॥ यदाहविर
पक्वंभवतिनदग्धेतेनैवहविषान्तकर्मसमाप्य चतुःशरावपरिमितव्रीहिभिरोदनंपक्त्वा चतुरोब्राह्म
द्वा णान्भोजयेत् ॥ यद्याध्वर्युराज्यभागानंतरंआहवनीयेस्रुवाहुतिंजुहुयात् ॥ रुद्रायस्वाहा ॥ रुद्रायेदं०
ततः सर्वप्रायश्चित्तंविष्णुस्मरणंचकुर्यात् ॥ तेनैवहविषायजेत ॥ विदग्धेप्रधानस्विष्टकृदिडा चतु
र्द्धीकरणपर्यात्तंसंभवतिनप्रायश्चित्तं ॥ प्रधानत्रलाभेतेनेष्ट्वा पुनस्तस्यैदेवतायैअन्वाधानादि
सर्वोयागःकार्यः यद्वाअध्वर्युराज्यभागानंतरंआहवनीयेस्रुवाहुतिंजुहुयात् ॥ निर्ऋत्यैस्वाहा नि
र्ऋत्याइदं० ततः सर्वप्रायश्चित्तंविष्णुस्मरणंचकृत्वाशिष्टेनप्रधानंकुर्यात् ॥ आज्येनस्विष्टकृतं ॥ अ
न्येषांप्रतिपत्तिकर्मणांलोपः ॥ सर्वदाहेतस्मिन्नेवपरिदानादिहविरुत्पाद्य सर्वप्रायश्चित्तंकृत्वा
विष्णुंस्मृत्वातेनयजेत ॥ यद्वाअध्वर्युःविदग्धंजलेप्रास्यआज्यभागानंतरंस्रुवेणाहवनीयेजुहुयात् ॥ यन्मे ज्य
आत्मनोमिंदाभूत्० पुनरग्निश्चक्षुरदात्० इतिद्वाभ्यां ॥ ततः सर्वप्रायश्चित्तंविष्णुस्मरणंकृत्वा
आज्येनप्रचरेत् ॥ द्वैवैआज्यभागानंतरंअध्वर्युः स्रुवेणजुहुयात् ॥ वायवेस्वाहा ॥ वायवइदं० ॥ हे
प्राक् ततस्तेनयजेतचरोरप्यमाणोदिशि दिशि नापाद्युत्सिक्तेअग्नयेस्वाहेति स्रुवाहुतिः ॥ दक्षिणातश्चेध
च्ये मायपश्चार्द्धस्मरणायोत्तरतश्चसोमाययद्युपत्सर्वतश्चेसर्वाआहुतीर्विदिक्षुव्याहृतिभिः उ सिक्तंच ध
ग

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुमाज्येनाप्यायति॥ आप्यायस्वसंत इति द्वाभ्यां मिंदाहुतीर्जुहुयात्॥ ब्वर्वादीनां सर्ंस्रावे दुर्गादि
गणां प्रायश्चित्तं जातवेदसे मनोज्योतिर्महाव्याहृतयः एष दुर्गादिगणः॥ सौनायपाकसमयेकुंभी
मती स बहिः पतति चेत्तदा तस्यात्रांतरे आदाय॥ परिधि देशे मही द्यौः पृथिवी० मभिरिस्यनेनानि
नयेत्॥ सर्व प्रायश्चित्तं कृत्वा वशिष्टेन यजेत॥ सर्वनाशे पुनर्दोहादि आमिक्षायागेप्येतत्समानं॥
तस्यापयो वि[illegible]रत्वात् जुहूपभृ ध्रुवाज्यानां विपर्यासे॥ प द्यौ देवा अति० तन स्वाहे। त्याज्याहुतिं
ब्रह्मा जुहुयात्॥ तस्मै यजमानो पुर्ण्यं घनं दद्यात्॥ प्राक् प्रयाजेभ्यः परिधि देशाद्बहिर्यं गारः हि
पतेत्॥ पुरस्तात्तदांगारं स्रुवदंडेन निध्यात्॥ मा तपो मा यज्ञस्तप निषीदसी अध्वर्युं माधूंसीर्य
जमानं मा हिंसीरिति यदि दक्षिणतः पतेत्॥ तदा एव स्रुवदंडेन निदध्यात्॥ मा तपो मा यज्ञं० स
सि ब्रह्माणं मा हिंसी र्यजमानं मा हिंसीरिति॥ यदि पश्चात्पतेत्तदा एव स्रुवदंडेन निदध्यात्॥ स
मा तपो मा यद्धसि होतारं मा ंसी पत्नीं मा हिंसी र्यजमानं मा हिंसीरिति॥ तद्युत्तरतः पतेत्॥
न तदा स एव स्रुवदंडे निध्यात्॥ मा तपो मा० षीदसि॥ आग्नीध्रं मा हिंसी र्यजमानं मा हिंसीरि
ति॥ अथैनमनुप्रहरेत्॥ आहंध्व यंत्रे यज्ञं दधे निर्ऋंते रूपस्थात्तं देवेषु परिदद्मामि विद्वान्॥
१६ सुप्रजास्त्वं शतं हिमा मदेनं नो देवा मधिशर्म यच्छतेति॥ प्रत्युतमंगारमंगारमभिजुहुयात्॥ स
स्वंगो० यच्छ स्वाहेति॥ ततः सर्वप्रायश्चित्तं विष्णुस्मरणं च कुर्यात्॥ एतत्प्रायश्चित्तं परिधिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घानोत्तरं इति केचित्॥ आवश्यानेभ्य इति स्कंगापेदो ना दूर्वा वा सर्वेगत्यनेइ तिवत्ति कृतोक्तं॥ एतत्का
७ लातिरिक्तेंगारस्कंदने॥ इदंतएकंपर॰जनित्रेइ इतिमंत्रेण स्वायतनेपुनः क्षिपेत्॥ ततः सर्वप्रायश्चित्तं
नविस्फुलिंगमात्रस्यैतत्प्रायश्चित्तं॥ एतदाहवनीयस्यार्वाक्शम्यापरासात्ततनेशम्यापरासात्यस्
तोयदिशम्यापरासादाथतिर्यँन्नदापाथिकृती॥ अशक्तौ हृर्णाहुतिः॥ अंथेपथिकृतेयैँस्वाहेति॥ पुरो ग्न
डाशस्यभेदनेपातनेवा॥ किंतु ह्रतसिकि मुश्रेष्ठाः शान्तः शांतेरिहागहि॥ अघोरोयज्ञियो भूरस्त्वासी
दनं॰ दसदनंस्वमासीदसँस्वमितिबर्हिषिनिधाय॥ माहिंसीर्देवप्रेरितैं आज्येनतेजसान्यस्वमानः किं
च्चनरीरिषः॥ योगक्षेमस्यशांत्या अस्मिन्नासीनासीदबर्हिषीत्यभिमंत्र्य॥ सर्वप्रायश्चित्तं कुर्यात्॥
हविषांविपर्यासे नोद्वासने ब्रुस्वायद्दोदेवैति हृर्वव ज्जुहुयात्॥ तस्यैयन्नमानोप्युख्यंपनं दधा इ
नु त्॥ कपालार्द्धोद्वासने अध्वर्युराश्रावयतिचेत्तदाग्नये वैश्वानरायेति हृर्णाहुतिंजुहुयात्॥ हो
नरस्यवा तुः कर्त्रेब्रह्मस्येवाग्यमोविहितस्तद्द्वेषेतोदवात्र्यवंतुनइतिजपेत्॥ अपिवान्याबैछवीउपांशु
मध्यमादिर्येत्रयः स्वरोविहितस्तद्द्वेषेअध्वर्युः॥ आभिर्गीर्भिर्यं॰ स्यामस्वाहेतिस्रुवाहुतिं
जुहुयात्॥ इन्द्रापहरिवतइदं॰॥ यत्रआ॰एकशृत्यौविहितंतद्द्वेषेविष्णुस्मरत्यात्तदेवपुनः पठेत्॥ दि
आवाहैहनकालात्पूर्वंकेशकीटादिनापक्कहविर्दूषितं न्तायैनहविषः पुनरुत्पत्तिंकृत्वा नस्यैव
सर्वप्रायश्चित्तंचहुत्वा विष्णुस्मरणंचकृत्वातेनयष्टव्यं॥ यद्वा अध्वर्युराज्यभागानंतरंजु ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हांसकृद्गृहीत्वाजुहोति॥यन्मआत्मनःपुनरग्निरितिद्वाभ्यांमनोज्योतिः०घृतेनस्वाहा॥मनसेज्यो
तिषद्दं०ततोविष्णुंस्मृत्वाऔवाज्येनप्रचरेत्॥होतायष्टव्यादेवतामनूवाचोनरंकर्मयदिकुर्या
त्॥तदायत्रस्मरेत्तत्रैवौत्थायतत्रयस्वरेदेवतामावाहयेत्॥नमंत्रनीयनैर्मा॥यद्यस्थानिनीमा मनसेसेदे
वाहयेत्॥तदानिगमेयैषुतांनिगमयेत्॥स्थानिनींच॥अध्वर्युश्चयागकालेचेत्तुर्गृहीतेनऔवाज्ये
नयष्टव्यायजेत्॥तत्रदैवस्ययाज्यानुवाक्येहोत्रापठनीये॥अनुमंत्रणंयजमानेन॥ततोविष्णुस्म
रणं॥विपर्यासेनावाहनेकृत्वापूर्ववद्यद्दोदेवेतिजुहुयात्॥तस्मैयजमानोमुख्यंधनंदद्यात्॥आ
वाहनात्पूर्वंप्रधानयागाद्वाकृकेशकीटादिनाहविर्दोषेज्ञातेतस्यस्थानेश्रुतश्चतुर्गृहीतमाद वा
प्रयोगं ययजेत्॥अव्यापन्नेश्चयथापूर्वंततःपूर्वंसमाप्यव्यापन्नाहविर्मात्रस्यैवअन्वाधानादिपुनर्या
गःकर्तव्यः एवंद्वयोर्बहूनांव्यापत्तौसमानं॥व्यापन्नंहविर्जलेतूष्णींप्रक्षिपेत्॥प्रधानेकृतेहवि
र्व्यापत्तौपुनर्नयागः॥तत्राज्येनस्विष्टकृत्॥प्रयाजाद्यंगहविर्नाशेतुनष्टंहविरुत्साद्यतेनयजेत॥
नतत्रान्वाधानादिपुनःप्रयोगः॥प्रधानहविषांव्यापन्नावपिपुनःप्रयोगाशक्तौआज्यभागा
नंतरंअध्वर्युस्नुहांसकृद्गृहीत्वायन्मआत्मनःपुनरग्निर्नेत्रोज्योतिरितिहुत्वाविष्णुंस्मृत्वाऔवा
ज्यात्प्रचरेत्॥यदाहभगवान्बौधायनः॥आज्येनवाप्राचैसेवततःप्रायश्चित्तिरपिस्नुलुक्षि रे
प्रु प्रसंस्कारंतेमेमाज्यैर्वतद्दितिमिदाहुतीहुत्वामैस्वतींजुहोतिसेवततःप्रायश्चित्तिर्विज्ञायइति न
नदेनघ्रांदावाकदापिबौधायनेवाहनादिपूर्वकालाद्यत्रुत्केरिति॥सायंदोहेनष्टेप्रातर्दोहं
ना

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथहानंतरंस्मरणेसतिअभागिनीमिष्ठापुनरवदायभागिन्यायागःकर्तव्यःसमिष्ट्ययनुरनंतरंस्मरणेपुन
रन्वाधा× स्विष्टकृदनंतरस्मरणेसतिआज्येनयागःकर्तव्यः× नादिनायागः

धाविमर्श्य एकंभागमागमातेच्युताभ्यांयागंकुर्यात्॥ तेआंडीहनाशेतद्दैवत्यंपुरोडाशंकृत्वायागंआ
मिक्षानाशेप्येतन्नस्याःआतंर्दोहविकारत्वात्॥ आमिक्षामेवोपादायतयायजेतेतिकेचिद्वाजिननाशेआ
ट ज्येनयागः॥ सांनाय्येतुभयदोषेऐंद्राग्नेपंचशरावमोदनगार्हपत्येश्रपयित्वानेनेंद्रयागः॥ अत्रप्राय सर्व
श्चित्तंविष्णुस्मरणंचकार्यं॥ अग्न्योपहतौतज्जलेप्रक्षिप्यान्यंसंस्कृत्यतेनप्रचारः॥ चत्वारऋत्विजःय
स त्संख्ययाऋत्विग्भावंसंख्यायात्याहुतिहोमः॥ आज्यभागानंतरंकार्यःअनुग्रहीत्वग्राभागिन्यनुक्तौ ष्टु
खेहोतर्यपिअभागिनीपरोनुवाक्यांउक्त्वतिप्रागवदानात्स्मरणेसतिचतुर्गृहीतेनध्रुवाज्येनयागः
कर्तव्यः॥ पूर्वार्धावदानसमयेअपरार्धावदानेयद्वोदैवतिएवंवत्॥ ब्रह्मकर्तृकहोमादिष्वागा इ
आग्होनुर्याज्यानुवाक्याविपर्यासस्मरणेसतिएतदेवप्रायश्चित्तंकृत्वापुनःसम्यगुक्तार्थयागः
कार्यःकृतेतुयागेअनुवाक्याविपर्यासज्ञानेप्रायश्चित्तमेव॥ नयागाभ्यासः याज्यायामपिअवि
या हितायांतद्देवतायामन्यदेवतायांवाविहितदेवतोद्देशंकृत्वाविहितामेवदेवतांध्यायन्॥ यदिव
षट्कुर्यात्॥ नतदायागाभ्यासः॥ पूर्वोक्तंप्रायश्चित्तंविष्णुस्मरणंचकार्यं॥ अविहितयाज्यांव
दन् अविहितदेवतोद्देशध्यानंचकुर्वन्यदिवषट्कुर्यात्तदाः पूर्वोक्तंप्रायश्चित्तंकृत्वापुनरवदा
ययजेनस्विष्टकृदनंतरंस्मरणेआज्येनेत्यादिपूर्ववत्॥ अग्नीषोमीयेनपुरोडाशेनाग्नेययया
गेकृतेउक्तंप्रायश्चित्तंकृत्वाग्नेयेनाग्नीषोमीययागःकार्यः॥ सर्वप्रायश्चित्तंविष्णुस्मरणंच॥ ट
अवदानदोषेपुनरायतनादवदानं इतिनैयंकार्यार्थंयदुपादीयतेतस्यनत्कार्याकरणेतदर्थं
स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वप्रायश्चित्तं विष्णुसं० यीत्॥

मायैति अनसर्दर्थात्त पायातेनैनेवहहविषायष्टव्यामीतिवृत्तिः अवदानाद्यवदानादेः श्लेष्मादिनाना
शेषुपुनरायतनादेवादायसर्वप्रायश्चित्तंचकृत्वायष्टव्यंएकमाद्यवदानवैकल्येतेनेष्टाल्वंनो
अग्नेसत्वंनोअग्नइत्येताभ्यांस्रुवाहुतीहुत्वापुनरवदायजेतेसुक्ते प्रायश्चित्तं चद्रिकायां॥आश्रा
वणप्रत्याश्रावणावषट्कारेषुमंत्रांतरस्यूनातिरेकेसति॥आश्रावितमत्याश्रावितमिति॥अ
ध्वर्युः स्रुवेणजुहुयात्वषट्कारे अनागतेअतीतेवाहोमेकृतेपूर्ववन्मिदादिगणेनजुहुयात्॥
अध्वर्युः॥आहुतीर्हूयमानादि बहिः परिधिपतेत्तदाग्नीध्रः देवांजनमगन्यज्ञः० मरुहसः॥भूपतये
स्वाहा॥ द्रप्सश्चस्कंदहोत्राइति॥तामभिमृशन्तूष्णीमेवजुहुयात्॥यजमानस्तस्मैधान्यादिद
णपत्रंदद्यात्॥हुतेहविषिअनग्रौपतितेत्वंनोअग्नेसत्वंनोअग्नइत्येताभ्यांअध्वर्युःस्रुवाहुती
य हुत्वापुनरवदायजेत॥दुष्टेनहविषेष्ट्वासमिष्टंप्राकृदुष्टंहविरितियद्विज्ञानीयात्तदान्येनपुन यजुषः
र्यागः॥ऊर्ध्वंचेत्स्मरणंतदान्वाधानादिसर्वंकुर्यात्॥बहुविस्के यागेयद्देवत्तुदुष्टंहविस्मरेत्
तस्यैवपृथक्पृथक्यागोनसर्वस्य॥प्रयाजाद्यंगाकरणेतदेभ्यइत्यृचोव्याहृतयश्चस्रुवे
णजुहुयात्॥पिंडपितृयज्ञाकरणेप्येतत्प्रायश्चित्तंतदेतत्समिष्टयजुषः पूर्वंकार्यं॥सर्व
त्राज्ञानकरणेविशिष्यात्रेदंप्रायश्चित्तमित्यज्ञाने वास्रुवाहुतीजुहुयात्॥अनाज्ञा
तं० तथाप्स्वाहा॥पुरुषसंमितो० नथाप्स्वाहा॥द्वयोरप्यग्रयइतियागः॥आहतिहो

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हापा॰२ मं विष्णुस्मरणं चेति मदि॰अमावास्यां पौर्णमास्यां वा नोयात्॥यद्यन्यस्यग्निषु यजेन यदिवा
स्याग्निषु अन्यो यजेत॥तैर्षिकृतिः सा चोक्ता॥अशक्तौ पूर्णाहुतिः सा चोक्ता॥प्रायश्चित्तेकृ
ते पश्चादतीतमपि कर्म खे कार्यमित्येकआचार्यानेच्छंतीति विपश्चितः॥पाथिकृन्मुखेना ॰तु
ति पंचयागं वा कुर्यादिति केचित्॥तदेतदिष्टं नरारं भार्याकुर्यात्तत्र कारणवशान्न कृतं तदा
पथिकृन्मुखेन इष्ट्यंतरं कार्यं॥सूतिकापुत्रवांती विंशतिरात्रेण कर्माणि कारयेत्॥मासेन
स्त्री जननीततः प्राक् यजन एव स्वलायामपि कर्माणि कुर्यात्॥सूतके यजमानः कार्म
काले स्नात्वा कर्माणि कुर्यात्॥पदाध्वर्युरेक एव यजमानोपि नास्ति तदाएकाध्वर्युरेव प्राय
श्चित्तं॥सति यजनित्रयाणाम भावे नैतत्प्रायश्चित्तं॥यदा यज्वैव स्यात्॥नापरस्तदापि नैतत्प्रा
यश्चित्तमिति प्रायश्चित्तेचंद्रिकायामुक्तं॥यद्येकाकिंपतिः कुर्यात्स्याद्बौधायननिष्कृतिः॥इ
ति त्रिकांडमेडनः॥तत्र यदाध्वर्युरेकएव करोति तदा वपनांजनाभ्यंजनानि न भवंति॥अथप्रा
यश्चित्तचंद्रिकानुसारेण प्रयोगः॥अध्वर्युः कृतस्नानादिक्रियः पवनमंत्राचमनं मंत्रप्रोक्ष
णानि यजमानपत्न्यासह कृत्वा वेद्युत्करयोर्मध्यतः ए॰उ॰देवहूः॰मदंतिनि॥चतुः कृत्वोज
पेनेय गार्हपत्यस्य पश्चादुपविश्य माषुरस्तादिस्मादिनिविष्टमिश्यं नेजपि वा यजमानस्या
नुज्ञया पौर्णमासेष्ट्या यक्ष्येइति संकल्प्य॥सर्वं क्रमेण कुर्यात्॥निरूप्यमाणमनुमं ९

(१९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयाणि निर्वापोत्तरं स्वकालादुत्तरो गोणइति॥ न्याया देवं सर्वत्रोह्यं॥ कपालाभिमंत्रणादिः एवंए
कमंत्रके सर्वत्रहोतरेहीत्यंते स्वयमेव प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीतीत्या
चम्यतीर्थेन प्रविश्यांतर्वेद्यासीनः अग्नये समिध्यमानायानुब्रूहीत्युक्तो नमःप्रवक्रे इत्यादि सा
मिधेनीः पठन्नाधायांते वेदेनोपवीज्याग्ने महां असीतिनितिष्ठन्प्रवरं वदेत॥ ततः प्रविश्याग्नयरंद्र
मुक्त्वानुब्रूमहे इत्यनुमंत्र्यातिष्ठन्प्रवरं वदेत॥ ततः प्रविश्य अग्ने स्वाहेत्यनुमंत्र्य स्रुवाघारं होमानो
सोतियजमानमुक्त्वा देवं हूं इत्यादि हव्यवाडिसंतेतिष्ठन्वदेत॥ ततः पूर्ववदग्निं समृज्य भुवन
मसीत्यादि जुह्वा वादायतिष्ठन्॥ आस्यात्रमित्यादि यज्ञा यजेत्यंते वदेत्॥ ततः अग्नाविष्णू इत्यादि इत्या
मुखाघारणं कृत्वा हूंहूं इति जुह्वशिमुहृत्य इन्द्राय इ०॥ वागस्येंद्रीत्यादिना अनुमंत्र्य पाहिमेत्या
दिनाउदङ् इत्याक्रमणादि जुह्वसादनांतं कृत्वा ऊर्ध्वज्ञानुरूपविश्य दिग्वेदेर्व्युत्थरणानिम्हमोप्रादे
शंकुर्यात्॥ अदितिर्मा नाहन्मीति प्रायश्चित्तचंद्रिकायांतु देवं हूं इत्यादि जुह्वयजायजेस्यंते तिष्ठन्वदेत्उ
नुपविश्यादितिर्मानेत्यादिनं हन्मीत्यंतं कृत्वा अग्ने षट्पूर्वकमग्निं संमृज्येत्या शुनं॥ ततः आश्रा
० वय यज्ञ निद्यनुमंत्र्य स्यामादायोरितिष्ठन् ऊर्ध्वाग्रे[illegible]निधाय आश्राव्य प्रत्याश्राव्याग्निर्देवो हो स्पं
स्के नेत्यादि प्राविनारद्गत्यंते मुक्त्वा देवं सवितरेतं वे इत्यादिनानुमंत्र्य स्वेनामग्रहीसो दाशुषेत्यादि
आंगिरसोद्विमित्यंतं केवलमुक्त्वा मुखं संमृज्या उदकं स्पृशेत्॥ प्रायश्चित्ते चंद्रिकायां तु आ
नें

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आव्यतिष्ठन्नस्याआव्यासोमानुषइतिस्वेनामगृहीत्वोपविश्याआवययज्ञंदेवेषिस्यादिहोताहमा
१०५ नुषइतिअतमुक्कोदायुषैस्यायमुखसंमार्जनकृत्वेयुक्तं ततः होतृषदनाभिमंत्रणेनतनवेंद्यां सां
तत्रासीनेनयागस्यकरिष्यमाणत्वात्॥तृणनिरसनादिहोत्रंजुषध्वमिसंतंकृत्वाएकाध्वर्यवश्रा
यश्चिनंकुर्यात्॥आज्यस्थाल्याःसुवेणाहवनीयेजुहोतिजुष्टोवाचोभूपासं०न्माधाःस्वाहा॥स
रस्वत्यैस्वाहा॥वाचेसरस्वत्याइदं०॥इमांमेवाश्चिनायज्ञस्ययद्वाचोयदुरिष्टंतदश्विनेभेष
जेनसंदधाथाःस्वाहा॥अश्विनीभ्यामिदं०॥त्रातारमिंद्र०॥हुवेनु०थाविंद्रस्वाहा॥इंद्रायेदं०॥
यन्मेमनसंछिद्रंयद्वाचोयत्रमेहृदः॥देवस्तत्छमयंतुसर्वेसोमोबृहस्पतिश्चस्वाहा॥देवेभ्यः
८ सोमायबृहस्पतयइदं०॥यद्विद्वांसोयदविद्वांसोमुग्धाःकुर्वंतस्त्विजः॥अग्निर्मानस्मादेन
च सःश्रद्धादेवीप्रमुंचतान्स्वाहा॥अग्निःश्रद्धाभ्यामिदं०॥यदंतरिक्षं०प्रमुंचतुदुरितायानिच
कृमं०नसःस्वाहा॥अग्नयेगार्हपत्यायेदं०॥ब्रह्मत्वेहोत्रआध्वर्यवआग्नीध्रेवेकएवयज्ञेप
ण स्थर्याणितन्मेदेवारक्षंतामाहिंसिषुःस्वाहा॥देवेभ्यइदं०॥अहंब्रह्माहंहोताहमध्व
र्युरहमाग्नीध्रोहंयजमानेएकएवयज्ञेयस्थर्याणितन्मेदेवारक्षंतांप्राणान्मेमाहिंसिषुःस्वा ६
हा॥देवेभ्यइदं०॥व्याहृतिहोमंविष्णुस्मरणंचकुर्यात्॥सुचावादापयेत्॥अग्निहोत्रेस्यादि
नानतःसुचावादापयेत्॥यांतवेद्यांसीनःसर्वादेवतायजेत्॥अस्याक्रमणांनास्त्रिरजाव १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरूपवर्षवर्णेत्यादिनानुमंत्र्योपहूतः पशुमानसानीति द्विकत्काद्दक्षिणं पुरोडाशं चतुर्धा कृत्वा ४

श्रोष्ठनिमार्जनं

दानांतं सर्वं क्रमेणासीन एव कुर्यात्॥ ततः वामेन प्रदेशिन्याः पर्वणी उत्तमे अनामिकाया उत्तरमुष्ठनिर्माणेन
दकस्पर्शनं च कृत्वा वामेन दक्षिणमुपस्तीर्य तथैवा वांतरेडामवदाय दक्षिणेनैवांतरेणांगुष्ठ
वामेना मंगुली श्च द्वितीयं भागमवदाय नाभिघार्यांगुष्ठेनाभिसंगृह्य वांतरं गुष्ठमुष्टिं कृत्वा तां दक्षिणेनैव दक्षि त्यां
णेन वामेन चेडामादायोपह्वयेत्॥ तस्मिन्नुपहूते रस्तु स्कों बर्हिषि निधाय यामैषत्वं तं संप्राघान्या न
न्भागानादायेळाभागमित्यत्रांतरेळां प्राश्यान्यांश्च भागान्प्राश्याचम्य कुशिरसी स्यनुमंत्रयेत्॥
स्वकालादुत्तरो गोणाइतिन्यायात्॥ न भक्षणात्त्यागेवतदनुमंत्रणेनाचमनं प्राग शुद्धत्वात्॥ भे
देन मार्जनं कृत्वा क्रमेण सर्वं कुर्यात्॥ अन्वाहार्यं पृथक् पृक्थे प्रतिगृह्णीयात्॥ यजमाने कर्तरि ना
न्वाहार्यः॥ तत आसीनोनुयाजानिष्ट्वा स्रुग्विमोकांतं कृत्वा स्वयमेव वेदमादाय पत्नीसंयाजानिष्ट्वा ज्ञा
पूर्ववदाज्येळां प्राश्य शेषं समापयेत्॥ इति कानिचित्प्रायश्चित्तानि समाप्तानि॥ श्रीशुभमस्तु॥
जोश्योपनामक केशवज्योश्यात्मज विश्वनाथेन लिखितमात्मार्थं परोपकारार्थं च॥ भग्नपृ
ष्ठकटिग्रीवस्तब्धदृष्टिरधोमुखः॥ कष्टेन लिखितं ग्रंथं यत्नेन परिपालयेत्॥ ॥ ॥ ॥

इत्यापदेवकृतानि प्रायश्चित्तानि समाप्तानि॥ श्रीशुभमस्तु॥

22

॥ इति ऐहिकप्रायश्चित्तानि ॥

७२

KKSU LIBRARY
RAMTEK
441 106
M1131
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 12:12
,TRANSFERRED=2020/10/20 at 12:16:01
,PAGES=22
,TYPE=STD
,NAME=S0004214
,Book Name=M-1131-ESTIK PRAYCHIT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection